M. T. B. COLLEGE, SURAT

Manuscripts Library

Jain

No. Ref. / Ser. 1139

Title: Samskara
Prakarana

1139

C Samskara Prakarana

: : : **Title**

: : : Author

: : : Editor

: : : Year, Vols.

SK : : : Publisher

1139 : : : Remarks

श्रीगणेशायनमः अथसंस्कारप्रकरणं आद्यंरजःशुभंमाघमार्गराधेषुफाल्गुने ज्येष्ठ
संस्का॰ श्रावणयोःशुक्ले सद्वारेसत्तुनोदिवा १ ऋतित्रयमृदुक्षिप्रध्रुवस्वातौसितांबरे मध्यंयम
आदितिभैंपित्र्यमिश्रोग्रपरेष्वसत् २ भद्रानिद्रासंक्रमेदर्शरिक्तासंध्याषष्ठीद्वादशीवैधृ
१ तेषु रोगेष्टम्यांचंद्रसूर्योपरागेपातेचाद्यंनोरजोदर्शनंसत् ३ अथरजोदर्शनस्नानं ॥
हस्तानिलाश्वमृदुमैत्रवसुध्रुवाख्यैःशक्रान्वितैःशुभतिथौशुभवासरेच स्नायादधा
र्तववतीमृगपौष्णवायुहस्ताश्विधातृभिरलंलभतेचगर्भं ४ अथगर्भाधानं गंडांतत्रि
विधंत्यजेन्निधनजन्मर्क्षेचमूलांतकंदास्त्रंपौष्णमथोपरागदिवसान्पातंतथावैधृतिं पि
त्रोःश्राद्धदिनंदिवाचपरिघाद्यर्धंस्वपत्नीगमेभान्युत्पातहतानिमृत्युभवनंजन्मर्क्षतःपा १
पभं ५ भद्रांषष्ठींपर्वरिक्ताश्चसंध्याभौमार्कार्कीनाद्यरात्रीश्चतस्रः गर्भाधानंत्र्युत्त
रेंद्वर्कमैत्रब्राह्मस्वातीविष्णुवस्वंबुपेसत् ६ केंद्रत्रिकोणेषुशुभैश्चपापे त्र्यायारिगैः

पुंग्रहदृष्टलग्ने ओजांशगेंदावपियुग्मरात्रौचित्रादितीज्याश्विषुमध्यमेतत् ७ अथसी
मंतपुंसवनविष्णुपूजा जीवार्कारदिनेमृगेज्यनिर्ऋतिश्रोत्रादितिब्रह्मभैरिक्तामार्करसा
ष्टनवर्ज्यतिथिभिर्मासाधिपेपीवरे सीमंतोष्टमषष्ठमासिशुभदः केंद्रत्रिकोणेखलैर्लाभा
रित्रिषुवाध्रुवांत्यसत्स्वेंदुलग्नेचपुंभांशके ८ मासेश्वराःसितकुजेज्यरवींदुसौरचंद्रात्म
जास्तनुपचंद्रदिवाकराःस्युः स्त्रीणांविधोर्बलमुशंतिविवाहगर्भसंस्कारयोरितरकर्मसु
भर्त्तुरेव ९ पूर्वोदितैःपुंसवनंविधेयंमासेतृतीयेत्वथविष्णुपूजा मासेष्टमेविष्णुविधा
तृजीवैर्लग्नेशुभेमृत्युगृहेचशुद्धे १० अथजातकर्मनामकर्म तज्जातकर्मादिशि
शोर्विधेयंपर्वाख्यरिक्तोनतिथौशुभेह्नि एकादशोद्वादशकेपिघस्रेमृदुध्रुवक्षिप्रचरो
डुषुस्यात् ११ अथसूतिकास्नानं पौष्णध्रुवेंदुकरवातहयेषुसूतीस्नानंसमित्रभरवी
ज्यकुजेषुशस्तं नार्द्रात्रयश्रुतिमघांतकमिश्रमूलत्वाष्ट्रेज्ञसौरिवसुषड्नवरिक्तति

संस्कार थ्यां १२ अथप्रथमादिमासेदंतजननफलं मासेस्यात्प्रथमेभवेत्सदशनोबालोविनश्ये
त्स्वयंहन्यात्सःक्रमतोनुजातभगिनीमात्रग्रजान्द्व्यादिके षष्ठादौलभतेहिभोगमतुलंताता
२ त्सुखंपुष्टतांलक्ष्मीसौख्यमथोजनौसदशनोबोध्यःस्वपित्रादिहा १३ अथदोलानिष्क्रम
णे दोलारोहेर्कभात्पंचशरपंचेषुसप्तभैः नैरुज्यंमरणंकार्श्यंव्याधिःसौख्यंक्रमात्शिशोः १४
१२ दंतार्कक्षिपधृतिदिग्मितवासरेस्याद्द्वारेशुभेमृदुलघुध्रुवभैःशिशूनां दोलाधिरूढिरथनिष्क्र
मणंचतुर्थमासेगमोक्तसमयेर्कमितेथवास्यात् १५ अथजलपूजा कवीज्यास्तचैत्राधिमा
सेनपौषेजलंपूजयेत्सूतिकामासपूर्त्तौ बुधेंदुीज्यवारेविरिक्तेतिथौहिश्रुतीज्यादितीदर्क
नैर्ऋत्यमित्रैः १६ अथान्नप्राशनं रिक्तानंदाष्टदर्शंहरिदिवसमथोसौरिभौमार्कवारान्लग्नं १२
जन्मर्क्षलग्नाष्टमगृहलवगंमीनमेषालिकंच हित्वाषष्ठात्समेमास्यथचमृगदृशांपंचमा
द्योजमासेनक्षत्रैःस्यात्स्थिराख्यैःसमृदुलघुचरैर्बालकान्नाशनंसत् १७ केंद्रायकोणस २
हजेषुशुभैःखशुद्धेलग्नेत्रिलाभरिपुगैश्चवदंतिपापैः लग्नाष्टषष्ठरहितंशशिनंप्रश
स्तंमैत्रांबुपानिलजनुर्भमसच्चकेचित् १८ क्षीणेंदुपूर्णचंद्रेज्यभौमार्कौकिरभार्ग

संस्का संयुक्तेमृतिभवनेत्रिकोणकेंद्रव्यायस्थैःशुभखचरैःकवीज्यलग्ने पापाख्यैररिसहजा
यगैःसंस्थैर्लग्नस्थेचिदशगुरौशुभावहःस्यात् २५ अथचौलं गीर्वाणांबुप्रतिष्ठापरि
३ णयदहनाधानगेहप्रवेशाश्चौलंराजाभिषेकोव्रतमपिचशुभंनैवयाम्यायनेस्यात् नोवा
१३ बाल्यास्तवार्धक्येगुरुसितयोर्नैवकेनदयेस्यात्पक्षंवार्धकंचकेचित्जहतितमपरेयाव
दीक्षांतद्वये २६ पुरःपश्चाद्भृगोर्बाल्यंत्रिदशाहंचवार्धकं पक्षंपंचादिनंतद्वद्गुरोःपक्षमु
दाहृतं २७ नेंद्रशादद्वयोःप्रोक्तंकेचित्सप्तदिनंपरैः त्र्यहंबाल्यार्धकेप्यन्यैरर्धाहंत्र्य
हंविधोः २८ चूडावर्षात्तृतीयात्प्रभवतिविषमेष्टार्करिक्ताद्यषष्ठीपर्वोनाहेविचैत्रोदग ३
यनसमयेज्ञेंदुशुक्रेज्यकानां वारेलग्नांशयोश्चास्वभनिधनतनौनैधनेशुद्धियुक्तेशाक्रो
पेतैर्विमैत्रैर्मृदुचरलघुभैरायषट्त्रिस्थपापैः २९ क्षीणचंद्रकुजसौरिभास्करैर्मृत्युश ३
स्त्रमृतिपंगुताज्वराः स्युःक्रमेणबुधजीवभार्गवैःकेंद्रगैश्चशुभमिष्टतारया ३० पं
चमासाधिकेमातुर्गर्भेचौलंशिशोर्नसत् पंचवर्षाधिकस्येष्टंगर्भिण्यामपिमातरि ३१

वैः त्रिकोणव्ययकेंद्राष्टस्थितैरुक्तंफलंग्रहैः १९ भिक्षाशीयत्नरुद्दीर्घजीवीतानीचपित्त
रुक् कुष्ठीसान्नक्लेशवातव्याधिमान्भोगभागिति २० अथभूम्युपवेशनं पृथ्वीवराहमभि
पूज्यकुजेविशुद्धेरिक्तातिथौव्रजतिपंचममासिबालं बध्वाशुभोड्कटिसूत्रमथध्रुवेंदुज्येष्ठ
क्षमैत्रलघुभैरुपवेशयेत्कौ २१ तस्मिन्कालेस्थापयेत्तत्पुरस्तात्वस्त्रंशास्त्रंपुस्तकंलेखनीं
च स्वर्णरूप्यंयद्गृह्णातिबालःस्तैराजीविस्तस्यवृत्तिःप्रदिष्टा २२ अथतांबूलभक्षणं वा
रेभौमार्किहीनेध्रुवमृदुलघुभैर्विष्णुमूलादितींद्रस्वातीवस्वभ्युपेतैर्भमिथुनमृगवधूकुंभ
गोमीनलग्ने सौम्यैःकेंद्रत्रिकोणेश्शुभगगनगैःशत्रुलाभत्रिसंस्थैस्तांबूलंसार्धमासद्वय
मितसमयेप्रोक्तमन्नाशनेवा २३ अथकर्णवेधः हित्वैतान्चैत्रपौषावमहरिशयनंजन्ममा
संचरिक्तांयुग्माब्दंजन्मतारामृतुमुनिवसुभिःसंमितेमास्यथोवा जन्माहात्सूर्यभूपैःपरि
मितादिवसेज्यशुक्रेंदुवारेथोजाब्देविष्णुयुग्मादितिमृदुलघुभैःकर्णवेधःप्रशस्तः २४